# अथ प्रातः प्रार्थनाक्रमः

ब्राह्मे मुहूर्ते चोत्थाय वार्युपस्पृश्य माधवः ।
दध्यौ प्रसन्नकरणः स्वात्मानं तमसः परम् ॥१॥

एकं परं ज्योतिरनन्यमद्वयं स्वसंस्थया नित्यनिरस्तकल्मषम् ।
ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृतम् ॥२॥

अन्तःसरस्स्युरुबलेन पदे गृहीतो
ग्राहेण यूथपतिरम्बुजहस्त आर्तः ।
आहेदमादिपुरुषाखिललोकनाथ
तीर्थश्रवःश्रवणमङ्गलनामधेय ॥३॥

स्मृत्वा हरिस्तमरणार्थिनमप्रमेयः
चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाट्य तस्माद्
हस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥४॥

(श्रीसत्यसन्धतीर्थविरचिता श्रीमदुत्तरादिमठे नित्यार्चनीयानां श्रीमन्मध्वाचार्यकरार्चिताष्टाविंशतिमूर्तीनां स्तुतिः)